नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

२५ आतुरप्रत्याख्यान-प्रकिर्णकसूत्रम्

सटीक

(द्वितीयं प्रकिर्णकम्)

[मूलसूत्रम् + गुणरत्नसूरि विरचिता टीका (अवचूर्णिः)]

मू. (१) देसिक्कदेसविरओ सम्मद्दिट्ठी मरिज्ज जो जीवो ।
तं होइ बालपंडियमरणं जिनसासणे भणियं ॥

वृ. देशस्य त्रसकायस्य एकदेशः । संकल्पजनिर्वृत्तिरूप तस्यापि सापराध निरपराधत्वेनद्वि-प्रकारत्वात् । तस्य दैशिक देशमात्रस्य स्वद्य यं हननघातनत्वया विरतोनिवृत्तो सम्यक्दृष्टिः म्रियते यं व त्वमुपयाति । यःश्राद्धजीवः । तद् जिनशासने बालपंडितमरणमिति दृष्टं शेषशासनेषु बालादि भाषाया एवाभावात् । तत्र सर्वविरतिपरिणामाभावात् । बालं स्वबल प्राणातिपातादि विरमणाद्य पंडितं बालं च तत् पंडितं च बालं च ।

मू. (२) पंच य अणुव्वयाइं सत्त उ सिक्खा उ देसजइधम्मो ।
सव्वेण व देसेण व तेण जुओ होइ देसजई ॥

वृ. अथ यद्योगै देशयतिर्भवति तानि व्रतानि दर्शयन्नाह । 'पंचन्' अणूनि लघूनि व्रतात्मनादेशेन वा अन्यतर व्रतप्रतिपत्तिलक्षणेन युक्तो देशयतिर्भवतीति ॥

मू. (३) पाणिवहमुसावाए अदत्तपरदारनियमणेहिं च ।
अपरिमिइच्छाओऽवि य अणुव्वयाइं विरमणाइं ॥

वृ. 'पाणि०' । प्राणवधेन तुप्राणिवधोऽजीववध स्वस्वहेतुमशक्यत्वात् । मुसावायत्रिप्रकारः द्रव्यभवः । मृषामिथ्यावदननृण् । स च द्रव्यभावभेदाद्विधाक्रोधादि भेदादभूतोद्भावनभेदाच्चतुर्धा क्रोधादि भेदाः प्रसिद्धाः तत्राभूतोदभावनं यथा सर्वगत आत्माभूत निर्ष्क्रियो यथानास्त्यात्मा देवंतरान्वासो यथा गौरपिसत्रश्चोयमिति वदतः । परनिंदावचनो यथाकुष्टीत्वमिति । नदत्तम-दत्तं । तच्चस्वामिजीवतीर्थकरगुरुभेदतश्चतुर्धा । भीमोभीमासनिति न्यायाददत्वादानं परेषां दारा: परदाराः परकलत्राणि तेषां नियमनिरुपरमैः । अणुव्रतानि तावत् स्थूलशब्दोपपदानि सर्वाणि द्रष्टव्यानि । अपरिमितेच्छातश्च यानि विरमणानि । निर्व्रतय स्वैरणुव्रतानि भवेयुरिति ।

मू. (४) जं च दिसावेरमणं अनत्थदंडाउ जं च वेरमणं ।
देसावगासियंपिय गुणव्वयाइं भवे ताइं ॥

दिशां विरमणं दिक्विरमणं दिशायाकृत्वा यदिव रमणं तत् प्रथमं गुणव्रतं । जो धरइ

* અહીં ગુણરત્નસૂરિકૃત અવચૂરી લીધી છે, છતાં જેની અવચૂરી નથી તે આચાની સંસ્કૃત છાયા મૂકી છે.

दिसिदय मिमांसोऽभयं देइसयलजीवाणं भुवणंमियसरमाणं लोभ समुद्रं पडिखलेइ। अनर्थनिः प्रयोजनं दंडयते निपात्यंते। जीवा एभिरित्यनर्थ दंडास्तेभ्यो यत् विरमणं। द्वितीयं गुणव्रतमूलक्रमेण तृतीयं दिशामवकाशप्रतिदिनमानं तत्र भवं देशावकाशिकं तदपि च विरमणरूपं स तृतीयं गुणव्रतं मूलक्रमेण द्वितीयं शिक्षाव्रतं आह। अस्यशिक्षाव्रतत्वेन प्रसिद्धत्वात् कथं गुणव्रतमुच्यते। अत्रे भणंति। सव्वावए सुजेयमाणा तुचिय ते पुण फउणदिवस तुसारेइ आवश्यकचूर्णौ। सव्ववयाणं करिज्ज संखेवं तन्मतमाश्रित्य सर्वव्रतगुणकारत्वात् देशावकाशकस्यापि गुणव्रतत्वमित्यदोषः।

मू. (५) *भोगाणं परिसंखा सामाइयअतिहिसंविभागो य।*
पोसहविही य सव्वो चउरो सिक्खाउ वुत्ताओ॥

वृ. 'भोगाण्' सकृदेकवारं भुज्यंत इति भोगाः। (आहारपुष्पादयः। तथा तुपलक्षणत्वात् यत् परिभुज्यंत इति परिभोगाः) गृहांगनादिकः परिसंख्यानं प्रमाणकरणमित्यर्थः तत्प्रथमं शिक्षाव्रतं मूलक्रमेण तु प्रथमं अतिथे संविभागाऽतिथि संविभागः समुद्धये पौष (पौषिं) पुष्टं (पुष्टिं) द्वितीयं गुणव्रतमिति, समाय एव सामायिकं द्वितीयं शिक्षाव्रतं मूलक्रमेण तु प्रथमं अतिथे संविभागाऽतिथि संविभागः। समुद्धये पौषं पुष्टं धर्मस्य दधातीति पौषधं तुक्तं च जं पौसइ सुहकम्मंधारइ जीणं व कुगइ निचंडतं तपोसहंति भन्नइ एयं दुःखखयंगिहिणो॥

तस्यविधि इहत्य क्रमेण चतुर्थं शिक्षाव्रतं मूलक्रमेण तु तृतीयं एतानि चत्वारि शिक्षव्रतान्युक्तानि॥

मू. (६) *आसुक्कारे मरणे अच्छिन्नाए य जीवियासाए।*
नाएहि वा अमुक्को पच्छिमसंलेहणमकिच्चा॥

वृ. 'आसुण्०' आशुः शीघ्रं करणं कारः अचिंतितापश्चितोपक्रमणे अथवा क्रमेणैव मरणकालः समागतः परं संलेखनानां कारिकिस्मादिति छिन्नानत्रुटिता या जीविताशातया। जातिस्वजनै र्वा मुक्तः न मुक्तलिप्तः अतः पश्चिमकालकर्तव्यः। संलेखनां तपसा शरीरशोषणरूपां अकृत्वा अविधाय मरणं करोति तद् बालपंडितमरणमुक्त मित्येग्रेतन गाथायां संबंध इति गाथार्थः

मू. (७) *आलोइय निस्सल्लो सघरे चेवारुहित्तु संथारं।*
जइ मरइ देसविरओ तं वुत्तं बालपंडियय॥

वृ. स च गृहे कथं मिग्रत इत्याह आलोच्य गुरुसमीपे तद्दत्तं प्रायश्चितमंगीकृत्य शल्यं साद्रव्य भावभेदाद्विधा। शल्यकंटकादिभावशल्यं मूलोत्तरगुण विराधनादित तदालोचना दानेन। निशम्यः। साधैवं कृत्वा निजसदने एवारुह्य अंगीकृत्य संस्तारकं। अनशन प्रतिपत्ति काले दर्भ संस्तरणरूपं कृतं संस्तारकविधिनाहि यत् क्रियते तदनशनमपि संस्तारकमुच्यते यदि म्रियते तद्देशविरतस्वदुक्तं बालपंडितमित्यर्थः॥ तत्केन विधिना क्रियते इत्याह।

मू. (८) *भत्तपरिन्नाए उवक्कमो वित्थरेण निद्दिट्ठो।*
सो चेव बालपंडियमरणे नेओ जहाजुग्गं॥

वृ. यो भक्तपरिज्ञाध्ययने श्रावकस्यानशन प्रतिपत्ति कुर्वतः। उपक्रमः पीठबंधो विस्तरेण निर्दिष्टो भणितः। स एवात्रप्यध्ययने वा यथायोगं यथोचितं ज्ञेय इत्यर्थः॥

मू. (९) *वेमाणिएसु कप्पोवगेसु नियमेण तस्स उववाओ।*
नियमा सिज्झइ उक्कोसएण सो सत्तमंमि भवे॥

वृ. वैमानिका ज्योतिका अपि भवंतीतिव्यवच्छेदार्थं कल्पोपगतेषु न तु कल्पातीतेषु श्रावकस्य नियमेन सौधर्म्मादिषु पपातः। निश्चयेनोत्कृष्टतो भवानंगीकृत्य सप्तमे भवे सतीत्यर्थः

मू. (१०) *इय बालपंडियं होइ मरणमरिहंतसासणे दिट्ठं।*
इत्तो पंडियपंडियमरणं वुच्छं समासेणं ॥

वृ. तत्तो अनंतरं पंडित पंडित मरणं साधुमरणं वक्ष्येऽभिधास्ये। मासेन संक्षेपेणे इत्यर्थः॥ एतत् ग्रंथकारवचनं यदेवानेन भणितुमिष्टं तदेवक्षपक एव गुरुविज्ञप्तिधारणाह -

मू. (११) *इच्छामि भंते! उत्तमट्ठं पडिक्कमामि अईयं पडिक्कमामि अनागयं पडिक्कमामि पच्चुप्पन्नं पडिक्कमामि कयं पडिक्कमामि कारियं पडिक्कमामि अणुमोइयं पडिक्कमामि मिच्छत्तं पडिक्कमामि असंजमं पडिक्कमामि कसायं पडिक्कमामि पावप्पओगं पडिक्कमामि, मिच्छादंसण-परिणामेसु वा इहलोगेसु वा परलोगेसु वा सचित्तेसु वा अचित्तेसु वा पंचसु इंदियत्थेसु वा।*

अन्नाणंझाणे अनायारंझाणे कुंदसणंझाणे कोहंझाणे मानंझाणे मायंझाणे लोभंझाणे रागंझाणे दोसंझाणे मोहंझाणे इच्छंझाणे मिच्छंझाणे मुच्छंझाणे संकंझाणे कंखंझाणे गेहिंझाणे आसंझाणे तण्हंझाणे छुहाझाणे पत्थंझाणे पत्थाणंझाणे निद्दंझाणे नियाणंझाणे नेहंझाणे कामंझाणे कलुसंझाणे कलहंझाणे जुज्झंझाणे निजुज्झंझाणे संगंझाणे संगहंझाणे ववहारंझाणे कयविक्कयंझाणे अनत्थदंडंझाणे आभोगंझाणे अनाभोगंझाणे अनाइल्लंझाणं वेरंझाणे वियक्कंझाणे हिंसंझाणे हासंझाणे पहासंझाणे पओसंझाणे फरुसंझाणे भयंझाणे रूवंझाणे अप्पपसंसंझाणे परनिंदंझाणे परगरिहंझाणे परिग्गहंझाणे परपरिवायंझाणे परदूसणंझाणे आरंभंझाणे संरंभंझाणे पावाणुमोअणंझाणे अहिग-रणंझाणे असमाहिमरणंझाणे कम्मोदयपच्चयंझाणे इड्ढिगारवंझाणे रसगारवंझाणे सायागारवंझाणे अविरमणंझाणे अमुत्तिमरणंझाणे।

पसुत्तस्स वा पडिबुद्धस्स वा जो मे केई देवसिओ राइओ उत्तमट्ठे अइक्कमो वइक्कमो अईयारो अनायारो तस्स मिच्छामिदुक्कडं।

वृ. इच्छामि अभिलाषामि। भदंत इति गुरुंप्रति विज्ञापयति। तु त्रया अनशनं प्रतिपत्तिं कर्तुमभिलाषामि। सामान्यपापेभ्योनिवृते सर्वस्माद् सन्मार्गात् प्रपद्ये सामान्यतः प्रतिक्रमणे भणितेपि विशेषतस्त्रिकालविषयमप्याह। 'अईयं' अतीतपापव्यापारं अनागतं सावद्यारंभं प्रत्युत्पन्नं वर्तमानंकालमाविकर्मबंधं कृतं निष्पादितं पापमात्मना। कारितमन्येषां हस्तेन अनुमोदितं यन्मया शत्रु हननादि भव्यं कृतं। मिथ्यात्वमाभिग्रहिकादि पंचप्रकारं।

असंयमनेकविध स्वरूपं, कषायं चतुः प्रकारं, पापप्रयोगं त्रिविधं मनोवाक्काययोग-अप्रशस्त-योगं, मिच्छादंसण परिणामेसु वा इत्यादेषु पडिबुधस्य इवा इत्यंतेषु सर्वपदेषु इति योऽयं तत्र मिथ्यादर्शन परिणामे सति तद्वाछायन यो मम दैवशिकोरात्रिको वा अतिक्रमादि र्जात स्वस्यमिथ्या-दुष्कृतं परलोकेषु मनुष्यजाति व्यतिरिक्तेषु तिर्यगादिषु यदपराधं सचित्तेषु पृथिव्यादिषु य संघटनादिकृतं अचित्तेषु शुचिरतृणादिषु, पंचसु इंद्रियार्थेषु मनोज्ञा मनोज्ञाषु अनुरागविरागादिकृतं तस्य, अज्ञानादिध्यानेषु अशुभयो मे अज्ञानादीनां अतिक्रमादिजातस्य प्रतिक्रमामीति, सर्वध्यानपदेषु अनुस्वारो लाक्षणिकः। अनाचारस्य (दुष्टाचरस्य) ध्यानमनाचारध्यानं।

ऊझितं दर्शनं तस्यध्यानं क्रोधनं क्रोधस्वस्य ध्यानं माननं मानः स्वोत्कर्ष स्वस्यध्यानं परविप्रतारण स्वरूपं माया तस्याध्यानं लोभनं लोभस्वरूपं ध्यानं तस्मिन् मोहनं मोहस्वस्य ध्यानं तस्मिन् अर्धस्याभिलाषातिरेकः । इच्छाया ध्यानमिच्छा ध्यानं तस्मिन् मिथ्याविपर्यस्तधीत्वं मिथ्यायाध्यानं तस्मिन् १२ मूर्छनं मूर्छा अत्यंत रागात् वा निष्ठंगः । १३

संशयकरणं शंका । १४

कांक्षिणं कांक्षा अन्यान्यदर्शनग्राही । १५

गृद्धि । आहारादिष्वत्यंतमाकांक्षा । १६

आशायाध्यानं । १७

तृट् परीषहोदयः । जातपीडाविशेषः । १८

क्षुत् परीषहोदयजन्यः कष्टविशेषः । १९

अल्पकालगम्योऽध्वापथिवा ध्यानं तस्मिन् । २० अनुस्वारौ द्वावपि अलाक्षणिका ।

ततः प्रस्थानमशुभमनसा गमनं अथवा महान् पंथा तस्य ध्यानं । २१

नितरांद्राणं कुजितत्वगभनं निद्रा । २२

स्वर्गादि सृधि प्रार्थनं निदानं । २३

स्नेहोमोहोदय जन्यः प्रति विशेषः । २४

कामोविषयाभिलाषः । २५

अपमानतः परगुणोत्कर्ष प्रशंसामि सूयतिश्चित्वस्यकलुषभावः । २६

कलहो वाचिकाराटीत तस्य ध्यानं । २७

युधं परस्परं प्राणव्यापरोपणाध्यवसायो वैरिणं प्रति ॥ २८

निर्गतमध्ययुधं (नियुधं) दृष्टिमुष्ट्यादिभिरेव जय हारिकारकं बाहुबलिभरतयोरिव ॥ २९

परित्यक्तेष्वपि पुनः संयोगोऽभिष्वंगः ॥ ३०

संग्रहोइत्यर्थ मातृव्याधनमीलनं । ३१

व्यवहरणं व्यवहारः कार्यपरिछेदार्थं राजकुलादौ तस्य पुत्रथनार्थं देशांतयरायात् ।

सार्थवाहपत्योरिव । ३२

क्रियविक्रयो यो लाभार्थमल्पमूल्येन बहुमूल्यवस्तु ग्रहणं ॥ ३३

अनर्थदंडोनिष्प्रयोजन प्राणिघातनं ॥ ३४

आभोगो ज्ञानपूर्वको व्यापारः । ३५

अनाभोगोऽत्यंत विस्मृतिः ॥ ३६

अणं सृणं तेन आविलकलुषः सृणार्त्तस्य यत् ध्यानं । ३७

वैरं पितृभ्रष्टेवधादि समुद्भवं । राज्याप हारादि समुद्भवं वा ॥ ३८

वितर्क ऊहः कथं राज्यादि गृहीष्ये इति चिंता । ३९

हिंसा महिषादि जीव मारणं । ४०

हसनं हासः परविप्रतारणं ॥ ४१

प्रहसनं प्रहासः उपहासः । निंदा स्तुतिः । ४२

प्रकृष्टोद्वेष प्रद्वेषस्वस्य ध्यानं तस्मिन् । ४३
फरुसमिति । निष्ठुरं कर्म तस्य ध्यानं तस्मिन् । ४४
भयं मोहांतर्गतानो कषायरूपा प्रकृतिस्वस्य ध्यानं तस्मिन् । ४५
आत्मप्रशंसा । ४६
परस्य निंदा परनिंदा तस्य ध्यानं । ४७
परस्य गर्हा परदोषोद्घाट्टनं । ४८
परिपृज्यते [illegible] इति परिग्रहः स [illegible] ॥ ४९
परेषां परिवादः परपरिवादः परविकाथनं ॥ ५०
परषां दूषणं परेणाकृतमपि तं प्रत्यात्मादोष च स्थापनं । ५१
आरंभ परोपद्रवस्वस्य ध्यानं । ५२
संरंभः । संकल्पः । विषयादिषु तीव्राभिलाषः ॥ ५३
परपापानुमोदनं भव्यमनेनकृतमिति वदनं ॥ ५४
अधिक्रियते । दुर्गतीक्षिप्यते आत्मानं नेत्यधिकरणं । कर्मोपादान हेतुः । ५५
कर्मोदय प्रत्ययं कर्मोदय प्रत्ययेन ध्यानं प्रथमं शुभपरिणाममततोपिश्च कुतश्चित् कारणात् कर्मोदयतोऽशुभ परिणामत्वं पर्यंतकाले द्विप्तोरिव ॥ ५६
ऋद्धिः । राज्यैश्वर्यादि प्राप्तिः ।
गुरोर्भाव । गौरवं । तद्भद्विधा द्रव्यतोवस्त्रादेर्भावतोऽभिमानतो । ५८
रस्यते आस्वाद्यते पुष्ट्यर्थमिति रसः रसानं द्रियाथायिक स्विकतादि । ५९
सातं सुखं तेन गौरवं तस्य ध्यानं तस्मिन् सातगर्वो यथा । अहमेव सुखीत्यभिमानः । ६०
विरतिर्विरमणं न विरमणं तस्य ध्यानं तस्मिन् । ६१
मुक्तिः संसारात् शिवगतिरूपा न मुक्तिरमुक्तिस्वस्या मुक्ति मरणं । तस्य ध्यानं यथा मुक्ति विघ्नेकरमेतन्निदानं मा कुरु । पुनःपुनःनिवार्यमाणस्यापि एतां विभूतिमनुभूय मुक्तिमपि न स्पृहाय यमित्याद्यशुभभावेन निदानं कुर्वतः भूतस्येवा ६२ ॥

कस्यामवस्थायांजातनीत्याह - प्रसुप्तस्यनिद्रांगतस्य प्रतिबुधस्वे जाग्रतः ॥ यो मे मया कोपि बहुवाल्पोवा दैवसिकोरात्रिकः । उत्तमार्थे ज्ञानादौ अतिक्रमः आधाकर्माद्यामंत्रणादौ प्रतिश्रवणरूपः व्यतिक्रमः स्वस्यैव ग्रहणाय पदभेद रूपः अतीचारः आद्या कर्माक्रिग्रहण-रूपः अनाचारस्य लक्षणमित्यर्थः जात इति पदाध्यायः तस्य सर्वस्यानाचारस्य मिथ्यादुष्कृतं भवतु ।

मू. (१२) *एस करेमि पणामं जिनवरवसहस्स वद्धमाणस्स ।*
सेसाणं च जिणाणं सगणहराणं च सव्वेसिं ॥

वृ. एषोऽहं सर्व संघ प्रत्यक्ष करोति नमस्कारं जिनवर वृषभस्य सामान्य केवलि श्रेष्ठस्य वर्धमानाभिधस्य शेषाणामपि वृषभादि जिनानां च शब्दादतीतानागतादि जिनानां सह गणधरैवर्त्तत इति सर्वेषां अत्रापि च शब्दान्निज निज संघ समेतानां ॥

मू. (१३) *सव्वं पाणारंभं पच्चक्खामित्ति अलियवयणं च ।*
सव्वमदिन्नादाणं मेहुण्णपरिग्गहं चेव ॥

छा. (१३) सर्वं प्राणारम्भं प्रत्याख्याम्यलीकवचनं च ।
सर्वमदत्तादानं मैथुनं परिग्रहं चैव ॥

मू. (१४) *सम्मं मे सव्वभूएसु, वेरं मज्झ न केणई ।*
अणसाउ ओसिरित्ताणं, समाहिमनुपालए ॥

वृ. समस्य भावः साम्यं समता मे मम सर्वजीवेष्ट वैरं विराधो मम न केनापि सार्धं आशाः सर्वाभिलाषरूपाः । व्युसृऽयत्यत्र का समाधिं मनस्वास्थ्यं अनुपालयेहं ॥

मू. (१५) *सव्वं वाहारविहिं सन्नाओ गारवे कसाए य ।*
सव्वं चेव ममत्तं चएमि सव्वं खमावेमि ॥

वृ. सर्वं चतुर्विधमाहार विधिं त्यजामि संज्ञाश्चतस्र आहार भय मैथुनपरिग्रहरूपा । दशवाहारभयमैथुनपरिग्रहक्रोधमानमायालोभ अलोकत्रयरूपा । सर्वस्य श्चापि गौरवं त्रिपक्कारं । कषायांश्च षोडशापि चैव शब्दोऽपि शब्दार्थे सर्वमपि च ममत्वं मूर्च्छात्यजामि ॥

मू. (१६) *हुआ इमंमि समए उवक्कमो जीवियस्स जइ मज्झ ।*
एयं पच्चक्खाणं विउला आराहणा होउ ॥

वृ. भूतेयदस्मिन्नवसरे उपक्रमोव्य यो जीवितस्य यदिमम् । एतवेव प्रत्याख्यानं विपुलाराधना हेतुर्भवत्वेत्यर्थः ।

मू. (१७) *सव्वदुक्खपहीणाणं, सिद्धाणं अरहो नमो ।*
सद्दहे जिनपन्नत्तं, पच्चक्खामि य पावगं ॥

वृ. प्रक्षीणानि सर्वदुःखानि येषां तेभ्यः सिद्धेभ्यो नमोऽस्तु अर्हद्भ्यश्च नमोस्तु, श्रद्धामि जिनप्रज्ञप्तं तत्त्वमिति शेषः (प्रत्याख्यामि य पापकं नव्यं कर्मसर्वमित्यर्थः ।) उक्तं साकार प्रत्याख्यानं अथ पंडितक्षपको भक्त प्रत्याख्यानं कुर्वन यद् भणति तदाह ।

मू. (१८) *नमुत्थु धुयपावाणं, सिद्धाणं च महेसिणं ।*
संथारं पडिवज्जामि, जहा केवलिदेसियं ॥

वृ. नमोस्तु तं गतं पापंमष्प्रकारं कर्म येषां तेभ्य च शब्दाश्च तीर्थकरेभ्यश्च महर्षीणां च गणधरादीनां महर्षिभ्यः षष्ठविभक्तीए भन्नइ चतुर्थं इति, ज्ञेयं संस्तारकं विदर्भ संस्तारकाद विधिना यदनशनं क्रियते तदप्युपचारतः संस्तारकमनशनं तं प्रपद्ये ऽहं यथा केवलि दर्शितमिति ।

मू. (१९) *जं किंचिवि दुच्चरियं तं सव्वं वोसिरामि तिविहेणं ।*
सामाइयं च तिविहं करेमि सव्वं निरागारं ॥

वृ. स तं अंगीकुर्वन् किं किंमपि भिद्यते इत्याह । यत् किमपि दुश्चरितमकृत्यं साधुभिर्न सेव्यं तत् सर्वं व्युसृजामि । समानि ज्ञानादीनि तेषामायोलाभः । समयः त्रिविधं ज्ञान श्रद्धान क्रियारूपं । सर्वमपि निराकारं आकाररहितं मरणस्यात्रत्वान्निरपवादं ।

मू. (२०) *बज्झं अब्भितरं उवहिं, सरीराइ सभोयणं ।*
मनसावयकाएहिं, सव्वभावेण वोसिरे ॥

मू. (२१) *सव्वं पाणारंभं० ॥*

मू. (२२) *सम्मं मे सव्वभूएसु० ॥*

मू. (२३) *रागं बंधं पओसं च, हरिसं दीण भावयं ।*
उस्सुगत्तं भयं सोगं, रइं अरइं च वोसिरे ।।

वृ. 'बज्झं' । बाह्यपात्रादि लक्षणं अल्पतरं कषायादि लक्षणं बंधमित्यर्थः । बंधशब्दः त्रिपदं । योज्यः । प्रद्वेषमत्सरं हर्षः स्वजनामालापकादौ मे महती पूजा भाविभीतीदीना वा भावतातां प्रत्यनीकायमानादौ । ऊशुकत्वं प्रतिबंधं सारवस्तुष्वितिज्ञ परिज्ञया परिजानामि । प्रत्याख्यान परिज्ञया परिहरामि निर्ममत्वमुपस्थित आश्रितः । आलंबनं च आश्रितः । मम आत्मैवाराधना हेतुरवशेषं च शरीरो पध्यादि व्यत्सृजामि ।।

मू. (२४) *ममत्तं परिजाणामि, निम्ममत्ते उवट्ठिओ ।*
आलंबणं च मे आया, अवसेसं च वोसिरे ।।

वृ. ममत्वं प्रतिबंधुसारवस्तुष्वतिज्ञ परिज्ञया परिजानामि ।

मू. (२५) *आया हु महं नाणे आया मे दंसणे चरित्ते य ।*
आया पच्चक्खाणे आया मे संजमे जोगे ।।

वृ. आत्मा ममज्ञान विषये आलंबनं स्फुटं भवतु । दर्शनेचारित्रेपि चात्मैव तथा प्रत्याख्यानेपि मक्त परिज्ञारूपे । संयमे सर्वविरतिरूपे प्रशस्तयोगत्रयरूपे ममात्मैवालंबनं । यत एत साध्यानि ज्ञानदर्शन चारित्राणि तानि चात्मनः कदाचिन्न भिन्नानि आत्मानो पादानेतान्यत्युक्तानि

मू. (२६) *एगो वच्चइ जीवो, एगो चेवुववज्जई ।*
एगस्स चेव मरणं, एगो सिज्झइ नीरओ ।।

छा.. (२६) एको व्रजति जीवः एकश्चैवोत्पद्यते ।
एकस्य चैव मरणं एकः सिध्यति नीरजस्कः ।।

मू. (२७) *एगो मे सासओ अप्पा, नाणदंसणसंजुओ ।*
सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ।।

छा. (२७) एको मे शाश्वत आत्मा ज्ञानदर्शनसंयुतः ।
शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः ।।

मू. (२८) *संजोगमूला जीवेणं, पत्ता दुक्खपरंपरा ।*
तम्हा संजोगसंबंध, सव्वभावेण (सव्वं तिविहेण) वोसिरे ।।

छा. (२८) संयोगमूला जीवेन प्राप्ता दुःखपरम्परा ।
तस्मात्संयोगसंबन्धं सर्वभावेन (सर्वं त्रिविधेन) व्युत्सृजामि ।।

मू. (२९) *मूलगुणे उत्तरगुणे जे मे नाराहिया पमाएणं ।*
तमहं सव्वं निंदे पडिक्कमे आगमिस्साणं ।।

वृ. प्राणातिपात पातादयः तुवर्णपिंडिविशुध्यादयः ये मयानाधारितान् सम्यक् परिपालिताः प्रमादेन । तदहं नाराधनं सर्वं निरवशेषं निंदामि आलसाक्षिकं आगमेष्याणागामानिनां (मूलोत्तरगुणानां विराधनां) प्रत्याख्यामि ।

मू. (३०) *सत्त भए अट्ठ मए सन्ना चत्तारि गारवे तिन्नि ।*
आसायण तेत्तीसं रागं दोसं च गरिहामि ।।

वृ. भयानि सप्तानि। अष्टोजात्यादीन्मदान् संज्ञा आहाराद्या चतस्रः। गर्वान् त्रीन् ऋध्यादीति। आशातनाः। त्रयस्त्रिंशत् राग द्वेष च गर्हामि जुगुप्से ॥

मू. (३१) *असंजममन्नाणं मिच्छत्तं सव्वमेव य ममत्तं।*
जीवेसु अजीवेसु य तं निंदे तं च गरिहामि ॥

वृ. असंयमं विराधना स्वभावेमेकविधं अज्ञानं मूढतानिरूपमेक भेदमेव। मिथ्यात्वं विपर्ययरूपं तदप्येकविधिं। सर्वमिव ममतां केषु जीवेषु गोऽश्वादिषु हरिण्यादिषु जीवेषु।

मू. (३२) *निंदामि निंदणिज्जं गरिहामि य जं च मे गरहणिज्जं।*
आलोएमि य सव्वं सब्भितरबाहिरं उवहिं ॥

वृ. निंदामि निंदनीयं असंयमकरणादि। गर्हामि मे गर्हणीयं पिंडग्रहादि। तथा आलोचयामिव गुरोर्निवेदयामि सर्वं निंदनीयं गर्हणीयं तथा सहाभ्यंतरेण वर्त्तत इति साभ्यंतरा तां बहिर्न बाह्या तां तुपधि मायामल्पतरां मनोदुष्प्रणिधान रूपं बाह्यां प्राणातिपात विषयमित्यर्थः ॥

मू. (३३) *जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ।*
तं तह आलोइज्जा मायामोसं (मायामद) पमुत्तूणं ॥

वृ. केनविधिनालोचनीयमित्याह - यथा बालःस यो जल्पन्नजल्पन् कार्यमकार्यं भणितंवाभणितं च। ऋजुकं निर्व्यलीकतया स्वमातृ कथयति। न पुनरेवं चिंतयति लज्जनीयमेतदत्र न वाच्यं, एतच्च वाच्यमिति। तत्राथैव। लोचयेत गुरोः प्रकटयेत्। मायां प्रच्छादनरूपां मृषां चान्यथाकथनरूपां परित्यजेत् ॥

मू. (३४) *नाणंमि दसणंमि य तवे चरित्ते य चउसुवि अकंपो।*
धीरो आगमकुसलो अपरिस्सावी रहस्साणं ॥

वृ. ज्ञानं पंचप्रकारकेयाज्यः। तथा दर्शनि क्षायोपशमिका वा योज्यः। तपसि- द्वादशप्रकार, चारित्रे य सामायिकादौ चतुर्धापि योज्यः। धीरोधैर्यमापादयति। आगमकुशलः अप्रतिश्रावीकेषां रहस्यानां आलोयकेनालोचितानां।

मू. (३५) *रागेण व दोसेण व जं मे अकयन्नुया पमाएणं।*
जो मे किंचिवि भणिवि भणिओ तमहं तिविहेण खामेमि ॥

वृ. रागेण। अतिप्रेमवशात्। प्रमादस्खलितादौ शिक्षितेनाधिष्टेन युक्तिमपि भवतं। अकृतज्ञतया प्रमादेन वाविरूपमाचरितं तं सर्वक्षमयामि यो मया कश्चिद्विरूपोऽलीकोऽधृतादिर्भवतां भणितस्तंहं त्रिविधेन क्षमयामि ॥

मू. (३६) *तिविहं भणंति मरणं बालाणं बालपंडियाणं च।*
तइयं पंडितमरणं जं केवलिणो अणुमरंति ॥

वृ. त्रिप्रकारं बाला इव बालः अज्ञानाविवेक विकलत्वात्। असंयता अविरत सम्यग् दृष्टिपर्यतास्तेषां बालानां तथा अविरतत्वेन बालादेशविरत्वेन च बाल पण्डिता, बालः, तृतीयं विज्ञानयुक्तत्वा-पंडिताः बुधतत्वास्तेषां मरणं पंडितयद्यस्माकेवलिनोऽनु म्रियंते। यतस्तेपि पादयोपगमन कुर्वंतीति ॥

मू. (३७) *जे पुण अट्टमईया पयलियसन्ना य वंकभावा य।*
असमाहिणा मरंति न हु ते आराहगा भणिया ॥

वृ. समाधि मरणे न मर्तव्यं असमाधिमरणे दोषा इति दर्शयन्नाह - ये जीवाः अष्टोम दस्थानानि येषां ते अदृष्टमदिकाः प्रचलिता विषयकषायादिभिः सन्मार्गात्परिभ्रष्टा संज्ञा बुद्धिर्येषां ते, अथवा प्रगलतसंज्ञं, चः समुच्चये वंच्यते आत्मापरोवा ऐहिक पारत्रिकलाभस्यायन सवक्रः । अथवा वंकः कुटिलः, असमाधिना अचित्तास्वास्थ्यरूपया म्रियंते ॥

मू. (३८) *मरणे विराहिए देवदुग्गई दुल्लहा य किर बोही ।*
संसारो य अनंतो होइ पुणो आगमिस्साणं ॥

वृ. मरणे विराधते निदानादिनादेव दुर्गतिर्भवति दुर्लभो दुष्प्रापश्च किलात्रोक्तो बोधः । अनंत पुद्गल परावर्त परिभ्रमणरूपः संसारो भवति । प्राकृतत्वात् वचनव्यत्ययः । अनंतसंसार परिभ्रमणमिति प्राकृतत्वादागमिष्यत काले ॥

मू. (३९) *का देवदुग्गई का अबोहि केणेव वुज्झई मरणं ।*
केण अनंतमपारं संसारे हिंडई जीवो ॥

वृ. अथ शिष्यस्तु प्रश्नयन्नाह - 'कादेव०' । (अथ प्रश्नस्य निर्वचनमाह)-

मू. (४०) *कंदप्पदेवकिब्बिसअभिओगा आसुरी य संमोहा ।*
ता देवदुग्गईओ मरणंमि विराहिए हुंति ॥

वृ. कंदर्पोतद्हास हसनं कंदर्पकरणे शीलाः कंदर्पाश्च ते देवाश्च कंदर्प देवाः । किल्विषं पापं ज्ञानाद्याऽशा तनादिकं । तद्योगादेवा ऽपिकिल्विषिकाः । अभियोजनमियोगाः । तद्योगादेवा अपि अभियोगाः अभियोगरूपा दुर्गति इत्यर्थः । असुराणां भावः कर्म वा असुरेणचंडकोपेन चरंत्यासुरिकादेवा अपि संमोहयंत्युन्मार्गदर्शनादिना मार्गान्मोक्ष मार्गोधसयंति ये ते संमोहः ता एतदैव दुर्गतयो मरणे विराधिते । एतद्गत्यादि भवंति ॥

मू. (४१) *मिच्छद्दंसणरत्ता सनियाणा कण्हलेसमोगाढा ।*
इय जे मरंति जीवा तेसिं दुलहा भवे बोही ॥

वृ. देवदुर्गति इति तस्य प्रश्नस्य निर्वचनमुक्तमथ का अबोही तस्य निर्वचनमाह । विपर्यस्तदृर्शनं मिथ्यात्व तत्र रताः । तथा सह निदानेन देवत्वावि प्रार्थनारूपेण वर्तत इति सनिदानाः तथा कृष्णां सर्व निकृष्टं । लेशां जीवपरिणामरूपामवगाढा प्राप्ताः ।

मू. (४२) *सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा ।*
इय जे मरंति जीवा तेसिं सुलहा भवे बोही ॥

वृ. का अबोहीत्यस्योत्तर मुक्तमथतद्विपक्षभूतं बोधिसुलभत्वमाह । सम्मेमित्यादि ॥

मू. (४३) *जे पुण गुरुपडिनीया बहुमोहा ससबला कुसीला य ।*
असमाहिणा मरंति ते हुंति अनंतसंसारी ॥

वृ. अथ केन अनंत पारमिति प्रश्नस्य निर्वचनमाह जे पुण० गृणातितत्वमिति । गुरुस्वंप्रतीत्याश्रित्यप्रत्यनीका । गुर्वाशातना । तथा बहुण त्रिंशन्मोहनीयस्थानवर्तिनः बहुमोहा सह सबलैरेकविंशत्यासबलस्थानैर्वर्तते इति कुशीलाः च समुच्चये ॥

मू. (४४) *जिनवयणे अनुरत्ता गुरुवयणं जे करंति भावेणं ।*
असबल असंकिलिट्ठा ते हुंति परित्तसंसारी ॥

वृ. जिनवचने अनुरुक्तास्तद्वासितमनसः गुरुवचनं धर्माचार्योपदेशं असबला शबलस्थानदूरवर्तिनः असंक्लिष्टास्तुपरित्त संसारिणा। भवंतीत्यर्थः ॥

मू. (४५) *बालमरणाणि बहुसो बहुयाणि अकामगाणि मरणाणि।*
मरिहंति ते वराया जे जिनवयणं न याणंति ॥

वृ. ये वराका जिनवचनं न जानंति ते बालमरणानिशस्त्रग्रहणादीनि बहुशो मरिष्यंति तथा बहुनि बहुकानि च अकामकानिरभिलाषाति मरणानि केचित्। केचित् वराका महारोगादि दुःखपीडिता अनिच्छंतोपि मरिष्यंति। जिनवचन बाह्याः संतः ॥

मू. (४६) *सत्थग्गहणं विसभक्खणं च जलणं च जलपवेसो य।*
अणयारभंडसेवी जम्मणमरणानुबंधीणि ॥

वृ. तीर्थादौ मस्तकेकक्रच दापनं, विष तालुपुटादिः वैराभ्यात्ज्वलन प्रवेशः, पंचाग्नि तपश्च जलप्रवेशः पयासि निमज्जानं माघमासे च शब्दादन्यदपि तु बंधनादि बालमरणं ज्ञातव्यं आचारः शास्त्रंविहितो व्यवहारस्येन भांडमुपकरणमाचारता वा अनाचारता सेवितुं शीलं येषां ते परिव्राजकादयो मिथ्यादृष्टयः। जन्ममरणानि तान्यनुबंधीनि बहुनि मरिष्यंतीत्यर्थः

मू. (४७) *उड्ढमहे तिरियंमिवि मयाणि जीवेण बालमरणाणि।*
दंसणनाणसहगओ पंडिअमरणं अणुमरिस्सं ॥

वृ. ऊर्ध्वलोकः अधोलोकः अधोग्रामादौ तिर्यगलोकेपि चाष्टादश योजन शतमाने मृतानि अनुभूतानि दर्शन ज्ञान समन्वितः सन अनुमरिष्ये ॥

मू. (४८) *उव्वेयणयं जाई मरणं नरएसु वेयणाओ य।*
एयाणि संभरंतो पंडियमरणं मरसु इण्हिं ॥

वृ. उद्वेग जनकं भयानकमुद्वेगकारि किं जति मरणंत संसारे भ्रमतस्ते भविष्यतीत्याध्याहारः। नरकेषु वेदनाः छेदनाद्याः एतानि संस्मरन् चिंतयन् ॥

मू. (४९) *जइ उप्पज्जइ दुक्खं तो इट्ठव्वो सहावओ नवरं।*
किं किं मए न पत्तं संसारे संसरंतेणं ? ॥

वृ. अथ गुरुणा श्रावित व्रतविराधने क्षपकचिंता। जई यदितुत्पद्यते जायते दुःखं कष्टं। ततो इष्टव्यो जेय स्वभावत स्वत प्रादुर्भावः न कोप्यात्म व्यतिरिक्तो धन्यो हेतु। आत्मैव हेतु रेति विचिंतयति। अथवा नवरं पुनः कियदुखमेतत्। पुरापि का दुःख परंपरा मे मया। मएत्तिमदेतद जात्यादौ असक्तचेत संसारे संसरता। भ्रमता स ताम प्राप्तानानुभूताः परंता अकामनिर्जया सोढाः अल्पस्यसेहते फलविशेषः। इदानीम्ज्ञानंतगुणनिर्जरालाभहेतुत्वा त्सम्यक् सोढव्या इत्यर्थः अथवा यदितुत्पद्यते दुःखं ततः किं कर्तव्यं इत्यहेतो तदाद्रष्टव्यो सौसखा मित्ररागादि। पुरुषादिर्वा कथंभूतः सखा आपदं ददातीति आपदः। ससखा दृष्टव्यः नवरमयं विशेषः। काश्च पतकत्री मे इति मां कर्मतापम् अत्रं न प्राप्ता। अथवा आपत कर्मतापन्ना मया कर्ता न प्राप्तानु लब्धा किं विशिष्ट न संसरतापरिभ्रमता संसारे ॥

मू. (५०) *संसारचक्कवालंमि सव्वेऽविय पुग्गला मए बहुसो।*
आहारिया य परिणामिया य नाहं गओ तित्तिं ॥

वृ. भवचक्रे भ्रमता मया सर्वेपि पुद्गलाः समग्रोपि पुद्गलास्तिकायः बहुशो अनेकशः आहारर्थेन गृहिता-परिणामिताश्च तद् सवेदनेन नाहं तृप्तिं गतो न संतोषमापन्न इत्यर्थः ॥

मू. (५१) *तणकट्ठेहि व अग्गी लवणजलो वा नईसहस्सेहिं ।*
न इमो जीवो सक्को तिप्पेउं कामभोगेहिं ॥

वृ. केन दृष्टांतेन तण० स्पष्टाः नवरं न 'इमो' न वायजीवः । शक्यस्तर्पयितुं तृप्तीं कर्तुं कामंशब्दरूप गंधाः । भोग रस स्पर्शास्तृप्ति इत्यर्थः ॥

मू. (५२) *आहारनिमित्तेण मच्छा गच्छंति सत्तमिं पुढविं ।*
सच्चित्तो आहारो न खमो मणसावि पत्थेउं ॥

वृ. अथ तेषु गृधस्यदोषान् आह - आहारेण हेतुनामत्स्या यांति सप्तमीं पृथ्वीं सचित्तमाहारं मनसापि प्रार्थयितुं न क्षमेते न सहत ॥

मू. (५३) *पुव्विं कयपरिकम्मो अनियाणो ऊहिऊण मइबुद्धी ।*
पच्छा मलियकसाओ सज्जो मरणं पडिच्छामि ॥

वृ. इति विज्ञातविषय विपाको भावित गुरुपदेशश्च क्षपको यदुणति तदाह । 'पुव्विं०' पूर्वं प्रथमं चत्वारि विचित्र । इत्यादिक्रमेण कृत परिकर्मोत्तिततोकृष्ट मध्यमजघन्य द्वादश (वर्ष द्वादश) मास द्वादश पक्षः संलेखनः । अनिदानो निदानरहितः । ईहिऊण वितर्क्य विचार्य सति तत्कालोत्पन्नं बुद्धिमुत्तरकाल भाविनीयपश्चाद्विचारणानंतर मलिन कषायो मर्दित संपरायः सनसद्योझटिति प्रतीष्ठान्यंगी करोति ॥

मू. (५४) *अक्खडेऽचिर भाविय ते पुरिसा मरणदेसकालम्मि ।*
पुव्वकयकम्मपरिभावणाए पच्छा परिवडंति ॥

वृ. अथ ये अप्रशस्ताने परिकर्मवान् शन प्रतिपद्यंते तेषामपायमाह - 'अक्खंड' अप्रशस्ता-तेनावसरेआराधनां कुर्वंति । चिरंप्रभूतं कालं भावितः परिकर्मित आत्मायै स्ता अवि विभक्तिलोपः प्राकृतत्वात् ते कृतानवसराराधनाः पुरुषामरण देशकाले मरण समये पूर्वकृत कर्मपरिभावनातश्च प्राकतन कर्मविपाकोदयतः । परिकर्मित आत्मायै स्तेति पतंति निदानानि कुर्वंति नंदिषेणवत् । दुर्गतिं च यांति करड क्रुरडवत् ॥

मू. (५५) *तम्हा चंदगविज्झं सकारणं उज्जुएण पुरिसेणं ।*
जीवो अविरहियगुणो कायव्वो मुक्खमग्गंमि ॥

वृ. यदि प्रस्तावकारिणाम कृताभ्यासानां च दोषस्तस्मात् किं कर्तव्यमिति गुरुंपदेशमाह । 'तम्हा' ० चंडकबंध्येवामदक्षिणावर्त्त भ्रमदष्ट चक्रारकमध्यं निर्गच्छद्धूर्धमुखशर प्रयोगतो भूस्तलिल कुंडिका तैलांतः प्रतिबिंबित गमनस्थाधोमुख पुत्तलिका वामलोचनचंद्रकवेध्यं राधावेधमित्यर्थः सकारणं सहेतुकमुद्युक्तेन पुरुषेण साध्यमित्यध्याहारः । यथा चंद्रक वेध्यां राधावेध्यां सकारणं राज्यादि लाभकृते केनापि सुरे प्रदत्त कल्पेन राजपुत्रेण साधते एवं त्वयापि चंद्रकवेध्यमिव कृते तु चंद्रकवेध्यमनशनं सकारणं स्वर्गापवर्गकमला लाभस्तुक्तेन सावधानेन साध्यमित्यर्थः । तर्हि कथंसाध्यत इत्याह - जीवोआत्मारूपा अविरहितगुणः । अमुक्तज्ञानदर्शन चारित्र गुणः कर्तव्यः मोक्ष २ मार्गज्ञानदर्शनचारित्रतयो रूपात्तथ्यवस्थितोहि चंद्रकवेध्यमाराधनां साधयतीत्यर्थः

मू. (५६)　*बाहिरजोगविरहिओ अब्भिंतरझाणजोगमल्लीणो।*
जह तंमि देसकाले अमूढसन्नो चयइ देहं॥

कथं मोक्षमार्गे जीव कर्तव्य इत्याह -' बहि०' बाह्ययोगैर्बाह्यसंबंधैर्गच्छोपकरणादिभिर्विरहितो वियुक्ताः अभ्यंतरध्यानयोग्य जिनसाधुगुण कित्तण इत्यादि रूपं अथआश्रित स्वधा कर्तव्य इत्याध्याहारः यथा तस्मिन् देशकाले तस्मिन्नवसरे मूढ सज्ञं अविगत चेतनस्त्यजंति देहं॥

मू. (५७)　*हंतूण रागदोसं छित्तूण य अट्ठकम्मसंकलियं।*
जम्मणमरणऽरहट्टं भित्तूण भवा विमुच्चिहिसि॥

एवं च वच्छतव देहत्यागिनः किं भावीत्याह। 'हंतू' ० भित्वाऽष्टकर्म संकलिका शृंखलां जन्ममरणरहट्टे भविनो जीवाः कर्मराशि प्रतिबंधा बलीवर्दवत् सततं परिभ्रमंति। तत्रापि ये केचनापि प्रमत्ता संतः पर्यटंति तीव्र दुःखानि सहंति। ये पुनरप्रमत्ता भ्रमंति। ते गुरुदेशना मोचिता संतोषं बंधरहिता सर्वांग मोक्षकरां सुगतिं प्राप्नुवंतमेवं भूतं जन्ममरणा रहट्टंछित्वा संसारात् मोक्षसेत्वं॥

मू. (५८)　*एयं संखुवएसं जिनदिट्ठं सद्दहामि तिविहेणं।*
तसथावरखेमकरं पारं निव्वाणमग्गस्स॥

वृ. एवं गुरुपकृते क्षपको वदति एवं एवं एतं वा सर्वमुपदेशं जिनदृष्टं श्रद्धो। त्रिविधेनः मनोवाक्कायेन कथंभूतमुपदेशं त्रसस्थावर क्षेमकरं सर्वजीवकल्याणकारि पुनःकथंभूतं पारंपरतीरं कस्य निर्वण मार्गस्य मोक्षपथस्येत्यर्थ : ॥

मू. (५९)　न हु तम्मि देसकाले सक्को बारसविहो सुयक्खंधो।
सव्वो अनुचिंतेउं धणियंपि समत्थचित्तेणं॥

वृ. अविरहितगुण-श्रुत चिंतनात् भवंति तदाह - न हु० नैवतस्मिन् देशकाल पर्यंत समये शिथिली भव सुबंधनेषु स्खलति जिह्वाबले अपत्यांयांश्रुत शक्ति,। शक्यः शकनीयौ द्वादशविधौ द्वादश प्रकारः श्रुतस्कंधः सर्वानिरविशेषः अनुचिंतयितुं धणियमित्यर्थमपि समर्थियित्वेन ध्दश्रुत शक्तिनापि॥

मू. (६०)　*एगंमिवि जम्मि पए संवेगं वीयरायमग्गंमि।*
गच्छइ नरो अभिक्खं तं मरणं तेण मरियव्वं॥

वृ. अत एकस्मिन्नापि यस्मिन्पदेस्थाने एक गाथा एक पदरूपे अधीते सति वीतराग मार्गे संवेगं मोक्षाभिलाषरूपं गच्छति प्राप्नोति नरो-मनुष्यो। भीक्ष्णं तन् मरणात् संवेग प्राप्तिरूपं तेन पदेन हेतुना मर्तव्य मित्यर्थः॥

मू. (६१)　*ता एगंपि सिलोगं जो पुरिसो मरणदेसकालम्मि।*
आराहणोवउत्तो चिंतंतो राहगो होइ॥

वृ. ततः किमित्याह। ता एण०। तस्मात् ततो एकमपि श्लोकं च परमेष्टि नमस्कार स्मरणरूपं यः पुमान् मरणकाले आराधनोपयुक्तः सन् चिंतयति सर्वं चिंतयन् स्म तूनाराधको भवति॥

मू. (६२)　*आराहणोवउत्तो कालं काऊण सुविहिओ सम्मं।*
उक्कोसं तिन्नि भवे गंतूणं लहइ निव्वाणं॥

वृ. आराधकस्य किं फलं 'आरा'० आराधनमिति तुक्तमथ प्रतिपत्त्यादुपयुक्तः । तुष्यतः कालं तच्चसुविहित सुसाधुः सम्यक् तुत्कृष्टतोऽतिशयेन सम्यगाराधनां कृत्वा त्रीन् भवान् गत्वा लभते निर्वाणं मोक्षमित्यर्थ :। एतदुक्तं भवति यदि परमसमाध्यानेन काले कति सम्यक् । ततश्च तृतीये भवे अवश्यं सिद्धति ॥

मू. (६३) *समणोत्ति अहं पढमं बीयं सव्वत्थ संजओमित्ति ।*
सव्वं च वोसिरामि एयं भणियं समासेणं ॥

वृ. एवं विज्ञातारा धने फलः कया वा सन् या सर्वं व्युसृजतीत्याह । समणो त्तिअहं पढमं बीअं सव्वत्थं संजतुमिति सव्वं च वोसिरामिं एयं भणियं समासेणं । प्रथमं तावदहं श्रमणो महाव्रतांगीकराकृत तपः द्वितीयं सर्वत्र समित्त गुप्त्या संयतोस्मितिगृहीते इन्द्रियः । ततः किं ममैवंविधस्य ततः किं प्रतिबंधेनाहाराभिलाषेण वा किं तं सर्वमपि व्यत्सृजामि एव समासेन भणितमित्यर्थः

मू. (६४) *लद्धं अलद्धपुव्वं जिनवयण सुभासियं अमियभूयं ।*
गहिओ सुग्गइमग्गो नाहं मरणस्स बीहेमि ॥

वृ. अथ क्षपको भावनां भावयन्निदमाह-लब्धं-प्राप्तम् अलब्धं पूर्वं परस्मिन् भवे परिभ्रमतामयान् कदाचिदाराधना वस्तु अनुभूतमित्यर्थ :। जिनवचन सुभाषितं। अमृतभूतं देव भोज्यं तुल्यं गृहीतोभयः सुगतिमार्गो मोक्षमार्ग नैहमिदानीं मरणस्य बिभेमीत्यर्थः ।

मू. (६५) *धीरेणवि मरियव्वं काउरिसेणवि अवस्स मरियव्वं ।*
दुण्हंपि हु मरियव्वे वरं खु धीरत्तणे मरिउं ॥

वृ. तथा धीरेणापि सुभटेनापि समर्तव्यं कायरामापि मर्तव्यं द्वाभ्यामपि प्रकाराभ्यां दुस्फटं मर्तव्यमेव तस्माद्वरंखु निश्चये धीरत्वेन मतुं युक्तमित्यर्थः ।

मू. (६६) *सीलेणवि मरियव्वं निस्सीलेणवि अवस्स मरियव्वं ।*
दुण्हंपि हु मरियव्वे वरं खु सीलत्तणे मरिउं ॥

वृ. शीलेनापि अलुत समाचारेण पालित निज प्रतिज्ञेनापि मर्तव्या । निशीलेनापि भ्रष्टप्रतिज्ञेनापि मर्तव्यं । द्वाभ्यामपि भेदाभ्यां मर्तव्यं तस्माद्वरं खुं शीलत्वेन मर्तुमित्यर्थः ।

मू. (६७) *नाणस्स दंसणस्स य सम्मत्तस्स य चरित्तजुत्तस्स ।*
जो काही उवओगं संसारा सो विमुच्चिहिसि ॥

वृ. इति स्थिरीभूते क्षपके गुरु सामान्योपदेशं फलश्वरेण गाथायं च केनाह - ज्ञानस्य विशेषोपयोगस्य दर्शनस्य सामान्योपयोगस्य सम्यक् तस्यनिशंकितद्याष्ट प्रकारस्य चारित्रस्य समितिगुप्तिभेदतोऽष्ट भेदस्य यः साधुः करिष्यति उपयोगं सावधानं त्वं स मुनिः । संसाराद् भवानिधि मोक्ष्यते बुध्यस्यतीत्यर्थः ॥

मू. (६८) *चिरउसियबंभयारी पप्फोडेऊण सेसयं कम्मं ।*
अनुपुव्वीइ विसुद्धो गच्छइ सिद्धिं धुयकिलसो ॥

वृ. चिरमुषितो ब्रह्मचारी येन सचिरोषितः ब्रह्मचार प्रस्फोद्य विध्नय शेषकंपूर्व क्षिप्तो धरितं कर्मज्ञानावरणादि आनुपूर्व्याक्रमेण विशुधो कर्ममलक्षालनात् क्षिप्तभयात्क्लेशः ।

मू. (६९) *निक्कसायस्स दंतस्स, सूरस्स ववसाइणो।*
संसारपरिभीयस्स, पच्चक्खाणं सुहं भवे ॥

निष्कषायस्य कषायरहितस्य दांतस्य इंद्रिय दमेन सूरस्य मोहमल्लजये, व्यवसायित आराधना पताका लाभाय संसारपरिभीतस्य भीरो। प्रत्या० अनशन प्रतिपत्तिरूपं शुभं भवतु।

मू. (७०) *एयं पच्चक्खाणं जो काही मरणवेसकालम्मि।*
धीरो अमूढसन्नो सो गच्छइ सासयं ठाणं ॥

एतत् प्रत्याख्यानं अनशन प्रतिपत्तिरूपं यः कोपि अन्योपि करिष्यति मरणदेशकाले धीरो विद्वान न मूढा संज्ञा ज्ञानं यस्य सो अमूढसंज्ञः। संपूर्णज्ञानं इत्यर्थः। (स गच्छति यात्युत्तम स्थानं मोक्षस्थानमित्यर्थः।)

मू. (७१) *धीरो जरमरणविऊ धीरो विन्नाणनाणसंपन्नो।*
लोगस्सुज्जोयगरो दिसउ खयं सव्वदुक्खाणं ॥

धियाराजत इति धीरस्तीर्थकृता जरामरणे वृद्धत्व निधने वेत्तीति जरामरणवित् तथाधियं बुद्धिं सर्वेषां भव्यानामराति ददातीति धीरः। विशिष्टंज्ञानं केवलज्ञानं। ज्ञायत इति ज्ञानं। तदेव सामान्यावबोधरूपं ताभ्यां संपन्न संयुक्तः लोकस्य चतुर्दश रज्ज्वात्मकयोद्योतकरोतु क्षयं विनासं सर्वं दुरितानां सर्व पापानां सर्वकर्माणमित्यर्थः ॥

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता आतुरप्रत्याख्यान प्रकीर्णकस्य गुणरत्नसूरिविरचिता टीका (अवचूर्णिः) परिसमाप्ता

२५ | द्वितीय प्रकीर्णकं आतुरप्रत्याख्यानं समाप्तं

***